श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षट्त्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षट्त्रिंशं दशकम् ॥

## परशुरामावतारवर्णनम्

अत्रेः पुत्रतया पुरा त्वमनसूयायां हि दत्ताभिधो
    जातः शिष्यनिबन्धतन्द्रितमनाः स्वस्थश्चरन् कान्तया।
दृष्टो भक्ततमेन हेहयमहीपालेन तस्मै वरा -
    नष्टैश्वर्यमुखान् प्रदाय ददिथ स्वेनैव चान्ते वधम् ॥ **36.1** ॥

सत्यं कर्तुमथार्जुनस्य च वरं तच्छक्तिमात्रानतं
    ब्रह्मद्वेषि तदाखिलं नृपकुलं हन्तुं च भूमेर्भरम्।
सञ्जातो जमदग्नितो भृगुकुले त्वं रेणुकायां हरे
    रामो नाम तदात्मजेष्ववरजः पित्रोरधाः सम्मदम् ॥ **36.2** ॥

लब्धाम्नायगणश्चतुर्दशवया गन्धर्वराजे मना -
    गासक्तां किल मातरं प्रति पितुः क्रोधाकुलस्याज्ञया।
ताताज्ञातिगसोदरैः सममिमां छित्वाऽथ शान्तात् पितु -
    स्तेषां जीवनयोगमापिथ वरं माता च तेऽदाद्वरान् ॥ **36.3** ॥

पित्रा मातृमुदे स्तवाहृतवियद्धेनोर्निजादाश्रमात्
    प्रस्थायाथ भृगोर्गिरा हिमगिरावाराध्य गौरीपतिम्।
लब्ध्वा तत्परशुं तदुक्तदनुजच्छेदी महास्त्रादिकं
    प्राप्तो मित्रमथाकृतव्रणमुनिं प्राप्यागमः स्वाश्रमम् ॥ **36.4** ॥

आखेटोपगतोऽर्जुनः सुरगवीसम्प्राप्तसम्पद्गणै -
    स्त्वत्पित्रा परिपूजितः पुरगतो दुर्मन्त्रिवाचा पुनः।

गां क्रेतुं सचिवं न्ययुङ्क्त कुधिया तेनापि रुन्धन्मुनि -
प्राणक्षेपसरोषगोहतचमूचक्रेण वत्सो हृतः ॥ 36.5 ॥

शुक्रोज्जीविततातवाक्यचलितक्रोधोऽथ सख्या समं
बिभ्रद्ध्यातमहोदरोपनिहितं चापं कुठारं शरान्।
आरूढः सहवाहयन्तृकरथं माहिष्मतीमाविशन्
वाग्भिर्वत्समदाशुषि क्षितिपतौ सम्प्रास्तुथास्सङ्गरम् ॥ 36.6 ॥

पुत्राणामयुतेन सप्तदशभिश्चाक्षौहिणीभिर्महा -
सेनानीभिरनेकमित्रनिवहैर्व्याजृम्भितायोधनः।
सद्यस्त्वत्ककुठारबाणविदलन्निश्शेषसैन्योत्करो
भीतिप्रद्रुतनष्टशिष्टतनयस्त्वामापतद्धेहयः ॥ 36.7 ॥

लीलावारितनर्मदाजलवलल्लङ्केशगर्वापह -
श्रीमद्बाहुसहस्रमुक्तबहुशस्त्रास्त्रं निरुन्धन्नमुम्।
चक्रे त्वय्यथ वैष्णवेऽपि विफले बुध्वा हरिं त्वां मुदा
ध्यायन्तं छितसर्वदोषमवधीः सोऽगात् परं ते पदम् ॥ 36.8 ॥

भूयोऽमर्षितहेहयात्मजगणैस्ताते हते रेणुका -
माघ्नानां हृदयं निरीक्ष्य बहुशो घोरां प्रतिज्ञां वहन्।
ध्यानानीतरथायुधस्त्वमकृथा विप्रद्रुहः क्षत्रियान्
दिक्चक्रेषु कुठारयन् विशिखयन् निःक्षत्रियां मेदिनीम् ॥ 36.9 ॥

तातोज्जीवनकृन्नृपालककुलं त्रिस्सप्तकृत्वो जयन्
सन्तर्प्याथ समन्तपञ्चकमहारक्तह्रदौघे पितॄन्।
यज्ञे क्ष्मामपि काश्यपादिषु दिशन् साल्वेन युध्यन् पुनः
कृष्णोऽमुं निहनिष्यतीति शमितो युद्धात् कुमारैर्भवान् ॥ 36.10 ॥

न्यस्यास्त्राणि महेन्द्रभूभृति तपस्तन्वन् पुनर्मज्जितां
गोकर्णावधि सागरेण धरणीं दृष्ट्वार्थितस्तापसैः।

ध्यातेष्वासधृतानलास्त्रचकितं सिन्धुं स्त्रुवक्षेपणा -
दुत्सार्योद्धृतकेरलो भृगुपते वातेश संरक्ष माम् ॥ **36.11** ॥

॥ इति श्रीमन्नारायणीये षट्त्रिंशं दशकं समाप्तम् ॥